# ॥ कालभैरवाष्टकं ॥

देवराज-सेव्यमान-पावनांघ्रि-पङ्कजं व्यालयज्ञ-सूत्रमिन्दु-शेखरं कृपाकरम् ।
नारदादि-योगिबृन्द-वन्दितं दिगंबरं काशिकापुराधिनाथ-काल-भैरवं भजे ॥ १ ॥

भानुकोटि-भास्वरं भवाब्धितारकं परं नीलकण्ठम्-ईप्सितार्थ-दायकं त्रिलोचनम् ।
कालकालम्-अंबुजाक्षम्-अस्तशून्यम्-अक्षरं काशिकापुराधिनाथ-काल-भैरवं भजे ॥ २ ॥

शूलटंक-पाशदण्ड-पाणिमादि-कारणं श्यामकायम्-आदिदेवम्-अक्षरं निरामयम् ।
भीमविक्रमं प्रभुं विचित्रताण्डवप्रियं काशिकापुराधिनाथ-काल-भैरवं भजे ॥ ३ ॥

भुक्तिमुक्ति-दायकं प्रशस्तचारु-विग्रहं भक्तवत्सलं स्थिरं समस्तलोक-विग्रहम् ।
निक्वणन्-मनोज्ञ-हेम-किङ्किणी-लसत्कटिं काशिकापुराधिनाथ-काल-भैरवं भजे ॥ ४ ॥

धर्मसेतु-पालकं त्वधर्ममार्ग-नाशकं कर्मपाश-मोचकं सुशर्म-दायकं विभुम् ।
स्वर्णवर्ण-केशपाश-शोभिताङ्ग-निर्मलं काशिकापुराधिनाथ-काल-भैरवं भजे ॥ ५ ॥

रत्नपादुका-प्रभाभिराम-पादयुग्मकं नित्यमद्वितीयम्-इष्ट-दैवतं निरञ्जनम्।
मृत्युदर्प-नाशनं करालदंष्ट्र-भूषणं काशिकापुराधिनाथ-काल-भैरवं भजे ॥ ६ ॥

अट्टहासभिन्न-पद्मजाण्डकोश-सन्ततिं दृष्टिपात-नष्टपाप-जालमुग्र-शासनम्।
अष्टसिद्धिदायकं कपालमालिका-धरं काशिकापुराधिनाथ-काल-भैरवं भजे ॥ ७ ॥

भूतसंघनायकं विशालकीर्ति-दायकं काशिवासिलोक-पुण्यपाप-शोधकं विभुम्।
नीतिमार्ग-कोविदं पुरातनं जगत्पतिं काशिकापुराधिनाथ-काल-भैरवं भजे ॥ ८ ॥

काल-भैरवाष्टकं पठंति ये मनोहरं ज्ञानमुक्ति-साधकं विचित्रपुण्य-वर्धनम्।
शोकमोह-लोभदैन्य-कोपताप-नाशनं ते प्रयान्ति काल-भैरवांघ्रि-सन्निधिं ध्रुवम्
ते प्रयान्ति काल-भैरवांघ्रि-सन्निधिं ध्रुवम्

हर हर नमः पार्वती पतये - - हर हर महादेव।

|| Kā-la-bhai-ra-vāṣ-ṭa-kaṁ ||

De-va-rā-ja-sev-ya-mā-na-pā-va-nāṅ-ghri-paṅ-ka-jaṁ
Vyā-la-ya-jña-sū-tram-in-du-śe-kha-raṁ kṛ-pā-ka-ram |
Nā-ra-dā-di-yo-gi-bṛn-da-vandi-taṁ di-gam-ba-raṁ
Kā-śi-kā-pu-rā-dhi-nā-tha-kā-la-bhai-ra-vaṁ bha-je || 1||

Bhā-nu-ko-ṭi-bhā-sva-raṁ bha-vāb-dhi-tā-ra-kaṁ pa-raṁ
Nī-la-kaṇ-ṭham-īp-si-tār-tha-dā-ya-kaṁ tri-lo-ca-nam |
Kā-la-kā-lam-am-bu-jāk-ṣam-asta-śūn-yam-ak-ṣa-raṁ
Kā-śi-kā-pu-rā-dhi-nā-tha-kā-la-bhai-ra-vaṁ bha-je || 2||

Śū-la-ṭaṅ-ka-pā-śa-daṇ-ḍa-pā-ṇim-ādi-kā-ra-ṇaṁ
Śyā-ma-kā-ya-mā-di-de-vam-akṣa-raṁ ni-rā-ma-yam |
Bhī-ma-vik-ra-maṁ pra-bhuṁ vi-citra-tāṇ-ḍa-va-pri-yaṁ
Kā-śi-kā-pu-rā-dhi-nā-tha-kā-la-bhai-ra-vaṁ bha-je || 3||

Bhuk-ti-muk-ti-dā-ya-kaṁ pra-śas-ta-cā-ru-vi-gra-haṁ
Bhak-ta-vat-sa-laṁ sthi-raṁ sa-mas-ta-lo-ka-vi-gra-ham |
nik-va-ṇan-ma-no-jña-hema-kiṅ-ki-ṇī-la-sat-ka-ṭiṁ
Kā-śi-kā-pu-rā-dhi-nā-tha-kā-la-bhai-ra-vaṁ bha-je || 4||

Dhar-ma-se-tu-pā-la-kaṁ tva-dhar-ma-mār-ga-nā-śa-kaṁ
Kar-ma-pā-śa-mo-ca-kaṁ su-śar-ma-dā-ya-kaṁ vi-bhum |
Svar-ṇa-var-ṇa-ke-śa-pā-śa-śo-bhi-tāṅ-ga-nir-ma-lam
Kā-śi-kā-pu-rā-dhi-nā-tha-kā-la-bhai-ra-vaṁ bha-je || 5||

Ra-tna-pā-du-kā-pra-bhā-bhi-rā-ma-pā-da-yug-ma-kaṁ
Nit-ya-ma-dvi-tī-ya-miṣ-ṭa-dai-va-taṁ ni-rañ-ja-nam |
Mṛt-yu-dar-pa-nā-śa-naṁ ka-rā-la-daṁ-ṣṭra-bhū-ṣa-ṇaṁ
Kā-śi-kā-pu-rā-dhi-nā-tha-kā-la-bhai-ra-vaṁ bha-je || 6||

Aṭṭa-hā-sa-bhin-na-pad-ma-jāṇ-ḍa-ko-śa-san-ta-tiṁ
Dṛṣ-ṭi-pā-ta-naṣ-ṭa-pā-pa-jā-la-mu-gra-śā-sa-nam |
Aṣ-ṭa-sid-dhi-dā-ya-kaṁ ka-pā-la-mā-li-kā-dha-raṁ
Kā-śi-kā-pu-rā-dhi-nā-tha-kā-la-bhai-ra-vaṁ bha-je || 7||

Bhū-ta-saṅ-gha-nā-ya-kaṁ vi-śā-la-kīr-ti-dā-ya-kaṁ
Kā-śi-vā-si-lo-ka-puṇ-ya-pā-pa-śo-dha-kaṁ vi-bhum |
Nī-ti-mār-ga-ko-vi-daṁ pu-rā-ta-naṁ ja-gat-pa-tiṁ
Kā-śi-kā-pu-rā-dhi-nā-tha-kā-la-bhai-ra-vaṁ bha-je || 8||

Kā-la-bhai-ra-vāṣ-ṭa-kaṁ pa-ṭhan-ti ye ma-no-ha-raṁ
Jñā-na-muk-ti-sā-dha-kaṁ vi-cit-ra-puṇ-ya-var-dha-nam |
Śo-ka-mo-ha-lo-bha-dain-ya-ko-pa-tā-pa-nā-śa-naṁ
Te pra-yān-ti kā-la-bhai-ra-vāṅ-ghri-san-ni-dhiṁ dhru-vam
Te pra-yān-ti kā-la-bhai-ra-vāṅ-ghri-san-ni-dhiṁ dhru-vam

Hara hara na-maḥ pār-va-tī pa-ta-ye - - hara hara ma-hā-de-va|